ऽग्निदग्धस्य शालिबीजस्यैकदेशप्ररोहो दृश्यते। प्रवृत्तफलस्य तु कर्म्माशयस्य मुक्तेषोरिव वेगक्षयात् निवृत्तिः "तस्य तावदेव चिरम्" इति शरीरपातक्षेपकरणात्। तस्मादुपपन्ना यावदधिकारमाधिकारिकाणामवस्थितिः,न च ज्ञानफलस्यानैकान्तिकता। तथा च श्रुतिरविशेषेणैव सर्वेषां ज्ञानान्मोक्षं दर्शयति 'तद्यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम्' इति। ज्ञानान्तरेषु चैश्वर्य्यादिफलेष्वासक्ताः स्युर्महर्षयः ते पश्चादैश्वर्यक्षयदर्शनेन निर्विण्णाः परमात्मज्ञाने परिनिष्ठाय कैवल्यं ययुरित्युपपद्यते। 'ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्" इति स्मरणात्। प्रत्यक्षफलत्वाच्च ज्ञानस्य फलविरहाशङ्कानुपपत्तिः। कर्मफले हि स्वर्गादावनुभवानारूढे स्यादपि कदाचिदाशङ्का भवेद्वा न वेति, अनुभवारूढन्तु ज्ञानफलं "यत्साक्षादपरोक्षाद्ब्रह्म"इति श्रुतेः,"तत्त्वमसि" इति च सिद्धवदुपदेशात्। न हि "तत्त्वमसि" इत्यस्य वाक्यस्यार्थः तत्त्वं मृतो भविष्यसि इत्येवं शक्यः परिणेतुम्। "तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्य्यश्च" इति सम्यगदर्शनकालमेव तत्फलं सर्व्वात्मत्वं दर्शयति। तस्मादैकान्तिकी विदुषः कैवल्यसिद्धिः"भा०। ४।१पादे च।

"तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्"१३सू०।

"गतस्तृतीयशेषः, अथेदानीं ब्रह्मविद्याफलं प्रति चिन्ता प्रजायते, ब्रह्माधिगमे सति तद्विपरीतफलं दुरितं क्षीयते न वा क्षीयत इति संशयः। किं तावत् प्राप्तं फलार्थत्वात् कर्मणः फलमदत्त्वा न सम्भाव्यते क्षयः। फलदायिनी ह्यस्य शक्तिः श्रुत्या समधिगता। यदि तदन्तरेणैव फलोपभोगमपवृज्येत श्रुतिः कदर्थिता स्यात्। स्मरन्ति च 'न हि कर्म्माणि क्षीयन्ते' [म०भा०] इति। नन्वेवं सति प्रायश्चित्तोपदेशोऽनर्थकः प्राप्नोति। नैष दोषः, प्रायश्चित्तानां नैमित्तिकत्वोपपत्तेर्गृहदाहेष्ट्यादिवत्। अपि च प्रायश्चित्तानां दोषसंयोगेन विधानात् भवेदपि दोषक्षपणार्थता, नत्वेवं ब्रह्मविद्याया विधानमस्ति। नन्वनभ्युपगम्यमाने ब्रह्मविदः कर्मक्षये तत्फलस्यावश्यभोक्तव्यत्वादनिर्मोक्षः स्यात्। नेत्युच्यते देशकालनिमित्तापेक्षो मोक्षः कर्मफलवद्भविष्यति। तस्मात् न ब्रह्मविद्याधिगमे दुरितनिवृत्तिरित्येवं प्राप्ते ब्रूमः तदधिगमे ब्रह्माधिगमे सत्युत्तरपूर्वयोरघयोरश्लेषविनाशौ भवतः, उत्तरस्याश्लेषः, पूर्वस्य विनाशः। कस्मात्, तद्व्यपदेशात् तथा हि ब्रह्मविद्याप्रक्रियायां सम्भाव्यमानसम्बन्धस्यागामिनो दुरितस्यानभिसम्बन्धं विदुषो व्यपदिशति "यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते"इति। तथा विनाशमपि पूर्वोपचितस्य दुरितस्य व्यपदिशति "तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते" इति। अयमपरः कर्मक्षयव्यपदेशो भवति। "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इति। यदुक्तमनुपभुक्तफलस्य कर्मणः क्षयकल्पनायां शास्त्रकदर्थनं स्यादिति। नैष दोषः, न हि वयं कर्मणः फलदायिनीं शक्तिमवजानीमहे, विद्यत एव सा, सा तु विद्यादिना कारणान्तरेण प्रतिबध्यत इति वदामः। शक्तिसद्भावमात्रे च शास्त्रं व्याप्रियते न प्रतिबन्धाप्रतिबन्धयोरपि। न हि कर्म क्षीयत इत्येतदपि स्मरणमौत्सर्गिकं न हि भोगादृते कर्म क्षीयते तदर्थत्वादिति, इष्यत एव प्रायश्चित्तादिना दुरितस्य क्षयः"सर्वं पाप्मानं तरति""तरति ब्रह्महत्यां योऽश्वमेधेन यजते"। य उचैनमेवं वेद" इत्यादि श्रुतिस्मृतिभ्यः। यत्तूक्तं नैमित्तिकानि प्रायश्चित्तानि भविष्यन्ति इति। तदसत्, दोषसंयोगेन चोद्यमानानामेषां दोषनिष्कृतिफलसम्भवे फलान्तरकल्पनानुपपत्तेः। यत्पुनरेतदुक्तं न प्रायश्चित्तवद्दोषक्षयोद्देशेन विद्याविधानमस्तीति अत्र ब्रूमः। सगुणासु तावद्विद्यासु विद्यत एव विधानं, तासु च वाक्यशेषे ऐश्वर्य्यप्राप्तिः पापनिवृत्तिश्च विद्यावत उच्यते, तयोश्चाविवक्षाकारणं नास्तीत्यतः पाप्मप्रहाणपूर्वकैश्वर्य्यप्राप्तिस्तासां फलमिति निश्चीयते। निर्गुणायान्तु विद्यायां यद्यपि विधानं नास्ति तथाप्यकर्त्रात्मत्वबोधात् कर्मप्रदाहसिद्धिः। अश्लेष इति चागामिषु कर्मसु कर्तृत्वमेव न प्रतिपद्यते ब्रह्मविदिति दर्शयति। अतिक्रान्तेषु तु यद्यपि मिथ्याज्ञानात् कर्तृत्वं प्रतिपेदे इव तथापि विद्यासामर्थ्यात् मिथ्याज्ञाननिवृत्तेस्तान्यपि प्रलीयन्त इत्याह विनाश इति। पूर्वप्रसिद्धकर्तृत्वभोक्तृत्वस्वरूपविपरीतं हि त्रिष्वपि कालेष्वकर्तृत्वाभोक्तृत्वस्वरूपं ब्रह्माहमस्मि नेतः पूर्वमपि कर्त्ता भोक्ता वाऽहमासं नेदानीं नापि भविष्यति काले इति ब्रह्मविदवगच्छति। एवमेव च मोक्ष उपपद्यते, अन्यथा